"गौडी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः। शरद्ग्रीष्मवसन्तेषु माध्वी ग्राह्या न चान्यथा। कादम्बरी शर्करजादिमद्यं सुशीतलं हृद्यकरं मदाढ्यम्। माध्वीसमं स्यात् तथाहृत्तजातं मद्यं सुशीतं गुरु तर्पणञ्च। अन्यथा कुरुते पानं मद्यं सन्तापशोषदम्। अत्रदोषमदात्ययकारकं मूर्च्छनञ्च तत्"। "पर्युषितमल्पमेलनमम्लं वा पिच्छिलं विगन्धं वा। दोषावहमविशेषात् मद्यं हृद्यं विवर्जयेत् सर्वम्। मद्यप्रयोगं कुर्वन्ति शूद्रादिषु मह्यार्त्तिषु। द्विजैस्त्वभिस्तु न ग्राह्यं यद्यप्युज्जीवयेन्मृतम्" राजनि०। अधिकं मद्यशब्दे दृश्यम्। ४वसुदेवस्य पत्न्यां हरिवं० २६ अ०। ५दुर्गायां १७८ अ०। "सप्तभकारकृतावसितौ च गुरुः कविभिः कथिता मदिरा" इ० र० टी० उक्ते द्वाविंशत्यक्षरपादके ६छन्दोभेदे स्त्री।

**मदिराक्षी** पु० १विराटस्य भ्रातरि भा०वि०३१अ०। मदिरामत्तखञ्जनाक्षीवाक्षियस्य प्रचसमा०। खञ्जनतुल्यनेत्रे त्रि० स्त्रियां ङीष्। [गञ्जाख्ये मद्यसन्धानार्थे गृहे अमरः

**मदिरागृह** न० मदिरसन्धानार्थं गृहम् शाक० त०।

**मदिराश्व** पु० १विराटनृपसेनापतिभेदे भा० आनु० २अ०। हिरण्यहस्तस्य श्वशुरे २प्राचीने नृपभेदे भा०अनु०१४७अ०।

**मदिरासख** पु० ६त० टच्समा०। आम्रवृक्षे जटा०। तस्य मदिरातुल्यास्वादत्वात् तथात्वम्। [मदिरायां हेमच०।

**मदिष्ठा** स्त्री अतिशयेन मदिनी मदयित्री इष्ठन् टिलोपः।

**मदेमहि** पु० प्रार्थनायाम् निघण्टुः।

**मदेव** पु० मद-वा० एव। मत्ते ऋ०१०।१०६।६।

**मदोत्कट** पु० मदेन दानवारिणा उत्कटः उद्भटः। १मत्तगजे अमरः २मदिरायां स्त्री राजनि०। ३मदोद्धते त्रि०।

**मदोदग्र** पु० मदेन हर्षेण दर्पेण वा उदग्रः उग्रः। १मत्ते "मदोदग्राः ककुद्मन्तः" रघुः। २नार्य्यां स्त्री शब्दमा०।

**मदोद्धत** त्रि० मदेन उद्धतः। मत्ते जटा०।

**मदोन्मत्त** पु० "मन्त्रो वाप्यथ वा विद्या सप्ताधिकदशाक्षरः। फट्कारपञ्चकादिर्यो मदोन्मत्त उदाहृतः" तन्त्रसारोक्ते १मन्त्रभेदे २मदेनोन्मत्ते त्रि०।

**मद्गु** पु० मस्ज-उ न्यङ्क्वा०। (पानिकौडि) १पक्षिभेदे अमरः। "मद्गुः स्निग्धो वातनाशी भेदकः शुक्रकारकः। रक्तपित्तविनाशी च शीतलः परिकीर्त्तितः" राजव०। २मद्गुरमीने नीलकण्ठः।

**मद्गुर** पुंस्त्री०मद-उरच् न्यङ्क्वा०। (मागुर) १मत्स्यभेदे। स्वार्थे क। तत्रैव अमरः स्त्रियां ङीष्। तद्गुणाः मत्स्यशब्दे भावप्र०उक्ताः। "निषादो मद्गुरं सूते" भा० अनु० ४८ उक्ते २सङ्कीर्णजातिभेदे (डुवुरि) पुंस्त्री०। "मद्गून् मीनभेदान् वाति ला-क लस्य रः" नीलकण्ठः। जलमज्जनेन मीनहारित्वात् तस्य तथात्वम्। "तस्मादेते जले मग्नाः मद्गुरा नाम विश्रुताः। ये हरन्ति सदाऽसंख्यान् समुद्रोदरचारिणः" हरिवं० ९५ अ०।

**मद्गुरप्रिया** स्त्री मद्गुरस्य प्रियेव। शृङ्गीमत्स्ये हेमच० "मद्गुरस्य प्रिया शृङ्गी" अमरः।

**मद्गुरसी** स्त्री मद्गोः मद्गुरस्येव रस—आस्वादोऽस्याः गौरा० ङीष्। शृङ्गीमत्स्ये शब्दर०।

**मद्य** न० माद्यत्यनेन करणे यत्। मदिराशब्दे उक्ते माध्वीकादिद्वादशविधे मादकद्रव्ये अमरः। मद्यभेदा वर्णभेदेन तत्पाननिषेधादिकं प्रा० वि० उक्तं यथा "पुलस्त्यः "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम्। माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरामद्यं सर्वेषामधमं स्मृतम्"। अनेनैकादशानां सुरात्वं निषेधयति मद्यशब्दस्तु मदहेतुद्रव्यमात्रवचनः तस्मादेव वचनात्तु मद्यमात्रं सुराशब्दार्थः। तथा च बृहस्पतिः "गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात्"। तथाच सुरात्वे क्रमेण प्रायश्चित्तं न स्यात्। यथा भविष्ये "सुरा तु पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे"। पैष्टीति तण्डुलविकारमात्रोपलक्षणम्। इतरे गौडीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौडीमाध्व्योर्गौणसुरात्वज्ञापनार्थम्। तेनैतत्पानेऽपि महापातकत्वमतिदिशति "यथैवैका तथा सर्वेति" पैष्ट्यां पूर्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्वा गौडी माध्वी च पूर्ववचनोक्ता पैष्टीदृष्टान्तत्वेनात्र दर्शिता न पातव्या द्विजोत्तमैर्ब्राह्मणैरित्यर्थः। त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात्। न च बहुवचनानर्थक्यपरिहारार्थम् उत्तमप्रतिपदिकानर्थक्यं युक्तं बहुवचनस्य सजातीयोपस्थापने चरितार्थत्वात्। अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकं क्षत्रियवैश्ययोस्तु "सुरा वै मलमन्नानामिति" वचनेन पैष्ट्येवेति स्थितम्। गोविन्दराजविश्वरूपधारेश्वराणामनुमतोऽयमर्थः। अतएव "एव माध्वी च गौडी च पैष्टी च त्रिविधा सुरा। द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचिदिति" यमवचनेऽपि द्विजा-